उभयप्राप्तौ कर्मणि । (६६/६२४)

पूर्वेण [1]षष्ठी प्राप्ता नियम्यते । उभयप्राप्तौ इति बहुव्रीहिः । उभयोः प्राप्तिर्यस्मिन् [2]कृति, सोऽयमुभयप्राप्तिः । तत्र कर्मण्येव षष्ठी विभक्तिर्भवति, न कर्तरि । आश्चर्यो गवां दोहो[3]ऽगोपालकेन । [4]रोचते मे ओदनस्य भोजनं देवदत्तेन । साधु खलु पयसः पानं यज्ञदत्तेन । बहुव्रीहिविज्ञानादिह [5]नियमो न भवति, आश्चर्यमिद[6]मोदनस्य नाम पाको ब्राह्मणानां च प्रादुर्भावः इति ।

[१४३] [7]अकाकारयोः [8]स्त्रीप्रत्यययोः प्रयोगे नेति वक्तव्यम् । (म. भा. १.४६८)

भेदिका देवदत्तस्य काष्ठानाम् । चिकीर्षा देवदत्तस्य कटस्य (म. भा. १.४६८) ।

[१४४] शेषे विभाषा । (म. भा. १.४६८)

[9]अकाकारयोः [10]स्त्रीप्रत्यययोर्ग्रहणात् तदपेक्षया शेषः स्त्रीप्रत्यय एव गृह्यते । शोभना हि सूत्रस्य कृतिः पाणिनेः [11]पाणिनिना वा (म. भा. १.४६८) । केचिदविशेषेणैव विभाषामिच्छन्ति, शब्दानामनुशासनमाचार्येण आचार्यस्य इति वा ॥

क्तस्य च वर्तमाने । (६७/६२५)

'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (२.३.६९/६२७) इति प्रतिषेधे प्राप्ते पुनः षष्ठी विधीयते । क्तस्य[12] वर्तमान[13]कालविहितस्य प्रयोगे षष्ठी विभक्तिर्भवति । राज्ञां मतः । राज्ञां बुद्धः । राज्ञां पूजितः । क्तस्य इति किम् ? ओदनं पचमानः । वर्तमाने इति किम् ? ग्रामं गतः ।

[१४५] नपुंसके भाव [14]उपसङ्ख्यानम् । (म.भा. १.४६८)

छात्रस्य हसितम् । [15]मयूरस्य नृत्तम् । कोकिलस्य [16]व्याहृतम् (म. भा. १.४६८) ।

[१४६] शेषविज्ञानात् सिद्धम् । (म. भा. १.४६८)

तथा च कर्तृविवक्षायां तृतीया[17]ऽपि भवति, [18]छात्रेण हसितम् इति ॥

---

1. षष्ठीप्राप्तं इ. ह. 2. कृति नास्ति फ, तस्मिन् ह, अस्मिन् क. 3. अशिक्षितेन क. ड. इ. फ. 4. उदाहरणमिदं नास्ति ह. 5. नियमो नास्ति ग. 6. मोदकानाम् इ, नाम नास्ति अ. ब. क. ड. फ. 7. अककारयोः इ. 8. स्त्रीप्रत्यययोरिह ग्रहणम् ड. 9. अककारयोः इ. 10. स्त्रीप्रत्यययोरिह ग्रहणम् ड. 11. पाणिनिना वा नास्ति ह, वा नास्ति ब.इ.ह. 12. च इत्यधिकम् ड. 13. °काले विहितस्य क. 14. क्तः इत्यधिकम् क, क्तस्य इत्यधिकम् ह. 15. नटस्य भुक्तं क. ड, नटस्याधीतम् क. 16. कूजितम् ड, रुदितम् इ. 17. विभक्तिरपि फ, अपि नास्ति ड. ह. 18. छात्रेणाधीतमिति ड, इति नास्ति फ.